## RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2019**
**THIRD YEAR (BATCH 2017-20)**
**SANSKRIT (Honours)**
**Paper : VI**

Date : 23/12/2019
Time : 11 am – 3 pm
Full Marks : 50+50

### Group - A

१. **एकः** प्रश्नः समाधेयः। 1 × 10

(क) भूमिसूक्तं कस्मिन् वेदे वर्तते? सूक्तेऽस्मिन् भूमिवैशिष्ट्यं यथा प्रतिपादितं तत् समासेनोपन्यसनीयम्। (1+9)

(ख) पाठ्यांशानुसारं रुद्रदेवताचारित्रिकवैशिष्ट्यं समासेन उपस्थापनीयम्।

**अथवा**

स्वेच्छया **द्वयोः** मन्त्रयोः आङ्गलभाषया वङ्गभाषया वा अनुवादः करणीयः। 2 × 5

(क) यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्।।

(ख) यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः।
यस्यामिदं जिन्वति प्राणदेजत्सा नो भूमिः पूर्वपये दधातु।।

(ग) यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा।।

(घ) नमोऽस्तु नीलग्रीवाय सहस्ताक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः।।

२. **एकः** प्रश्नः समाधेयः। 1 × 10

(क) "... राजानमुपससार पुत्रो मे जायतां तेन त्वा यजा इति" – राजपदेनात्र कस्य परामर्शः? अस्मत्पदवाच्यश्च कः? तस्य पुत्रस्याभिधानं किम्? उद्धृतांशे या प्रतिज्ञा प्रकटिता सा सम्यक् परिपालिता न वेति पाठ्यांशानुसारं संक्षेपेणोपस्थापनीयम्। (1+1+1+7)

(ख) शुनःशेपोपाख्यानं कुत्र समुपलभ्यते? शुनःशेपोपाख्यानं संक्षेपेण लिखत। (1+9)

**अथवा**

कस्यचिद् अनुच्छेद**द्वयस्य** वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 2 × 5

(क) अथ हैक्ष्वाकं वरुणो जग्राह, तस्य होदरं जज्ञे। तदु ह रोहितः शुश्राव। सोऽरण्याद् ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच –
नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम।
पापो नृषद्वरो जन, इन्द्र इच्चरतः सखा, चरैवेति।।

(ख) शश्वद्ध झषऽ आस। स हि ज्येष्ठं व्वर्धतेऽथेतिर्थी समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स औघ उत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति।

(ग) तं होवाचाजनि वै ते पुत्रो यजस्व माऽनेनेति स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशो न्वस्त्वथ त्वा यजा इति।

(घ) मनवे ह वै प्रातः। अवनेग्यमुदकमाजह्रुर्यथेदं पाणिभ्यामवनेजनायहरन्त्येवं तस्यावनेनिजानस्य मत्स्यः पाणीऽ आपेदे।।

३. **एकः** प्रश्नः समाधेयः। $1 \times 10$

(क) बृहदारण्यकोपनिषदि प्रतिपादित आत्मतत्त्वलाभोपायः समुपवर्ण्यताम्।

(ख) भवत्पाठ्यांशानुसारम् आत्मनः उत्क्रान्तिः समुपवर्णनीया।

४. यथेच्छं **द्वयो**ः वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। $2 \times 6$

(क) तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेत दानेन तपसानाशकेनैतमेव विदित्वा मुनिर्भवति। एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति। एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते – किं प्रजया करिष्यामो येषां नायमात्मायं लोक इति।

(ख) स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति। न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः।

(ग) तदेव सक्तः सह कर्मणेति लिङ्गं मनो यत्र निषक्तमस्य।
प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्।
तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति।

(घ) ... स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारम् अरे केन विजानीयाद् इत्युक्तानुशासनाऽसि मैत्रेयि...।

५. **एक**ः मन्त्रः सप्रसङ्गं व्याख्येयः। $1 \times 8$

(क) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः।।

(ख) अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः।।

## **Group - B**

६. **एक**ः प्रश्नः समाधेयः। $1 \times 12$

(क) अपादानकारके कश्चन निबन्धो विरचनीयः।

(ख) कर्मप्रवचनीये कश्चन प्रबन्धो लेख्यः।

७. सूत्र**द्वयं** व्याख्येयम्। $2 \times 7$

(क) विभाषा गुणेऽस्त्रियाम्।

(ख) अकथितञ्च।

(ग) न लोकाव्ययनिष्ठाखलर्थतृनाम्।

(घ) यस्य च भावेन भावलक्षणम्।

८. दीक्षितवचन**द्वयं** व्याख्येयम्। 2 × 4

(क) तमब्ग्रहणं किम्? गङ्गायां घोषः।

(ख) कर्मेत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्।

(ग) विनापि तद्योगं तृतीया "वृद्धो यूना" इत्यादिनिर्देशात्।

(घ) उपपदविभक्तेः कारकविभक्तिर्बलीयसी।

९. विषयद्वयमवलम्ब्य संक्षिप्तटीका**द्वयं** विरचनीयम्। 2 × 3

(क) कर्ता।

(ख) हेतुत्वं करणत्वञ्च।

(ग) आधारः।

(घ) सम्प्रदानम्।

१०. यथारुचि निम्नरेखाङ्कितस्थल**पञ्चके** सकारणं विभक्तिर्निर्णेया। 5 × 2

(क) हिमवतो गङ्गा प्रभवति।

(ख) पयोधरान् अधोऽधः।

(ग) बलिं भिक्षते वसुधाम्।

(घ) ग्रामं गच्छन् तृणं स्पृशति।

(ङ) रामेण बाणेन हतो वाली।

(च) वृक्षसेचने द्वे धारयसि मे।

(छ) अग्नये स्वाहा।

(ज) दिवसस्य द्विः भुङ्क्ते।

———— × ————